श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

परमहंस परिव्राजकाचार्य श्रीमुष्णं आण्डवन् श्रीरङ्गरामानुजयति कृतम्

# ॥ श्रीकमलाधोदक स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font. Our thanks to Sri. Mukund Kidambi for his help with the pictures.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकमलाधोदक स्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्मसरसीरुह भृङ्गराजम्।
त्रैय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्गलक्ष्मण मुनिं शरणं प्रपद्ये॥

कमला ममलां कमनीयबलां अबला जनता नतपा दयुगाम्।
ममबो धकरां मदपा पहरां मनवै हृदये सदयां नितराम्॥ १ ॥

सगणै र्दुरितै र्विततै स्सहितं सुगुणै र्महितै र्विविधै रहितम्।
कुरुमा ममलं ममपा पमुषी भवसा गरजे भवता पहरी॥ २ ॥

उदिता मदिते र्मनसा नुगतां सुरता पहरां बहुदो षमुषीम्।
मुदितां श्रुतिभिः कथितां मनवै हरिव त्सगुणां हरपा पहराम्॥ ३ ॥

कलिके लिहरीं करुणा लहरीं मलजा लहरीं महनी यमहाम्।
महिला कुलदो षहरीं महितां कलये सततं हरिणा सहिताम्॥ ४ ॥

मतिदां गतिदां रतिदां नुतिदां पतिदां विधिदां महितां विहिताम्।
उडुपा धिपसो दरका न्तिमुखीं कलये विपुलां प्रबलां सफलाम्॥ ५ ॥

मलया निलशी तलदृ ष्टिमतीं मधुसू दनमा नसहं सगतिम्।
मिहिरा रुणका न्तिमतीं कलये कलमा रुणपा दवतीं युवतीम्॥ ६ ॥

अरुणां तरुणां वरणी यपदां करुणा वरुणा लयभू तमताम्।
नमतां समतां वहतीं बृहतीं अमिता तुलवै भवशा लिनिधिम्॥ ७ ॥

कृपया भरितां नृपलो कहितां निखिला गमवे दनुतां हितदाम्।
कुटिला लकप ङ्क्तिमतीं बृहतीं निटिला क्षसती नतपा दयुगाम्॥ ८ ॥

सरसी रुहदृ ष्टियुतां जयदां हरिणी मनुरा गयुतां हसतीम्।
दुरिता द्रिविभे दकवी क्षणदां प्रतिभा प्रतिमां पृथुलां कलये॥ ९ ॥

तपनी यनिभां महनी यशुभां स्तवनी यगुणां कमनी यकृपाम्।
धनपां घनपां खगपां मखपां मृगपा मृतपां मनवै गृहपाम्॥ १० ॥

विविधै र्विबुधै र्नुतिभि र्विनुतां ससुधो दयज न्मवतीं सुमतिम्।
गजना दविबो धवतीं जलजां अजशू लिमहे न्द्रनुतां सततम्॥ ११ ॥

सुदया सहितां सुधया जनितां उदया चलभू तिकरी मचलाम्।
मुनिशा पहतं त्रिदशे न्द्रपदं परया कृपया परिपा लयतीम्॥ १२ ॥

अहिभो गशया मखिला त्मवतीं गरुतां मरुतां गतिपां मतिपाम्।
गुरुदा सजनै रुरुमा त्रतया प्रथितां ग्रथितां सगणै स्सुगुणैः॥ १३ ॥

कलवा ग्बलभा ग्फलभा ङ्नितरां भवती हजनो भवती-पदगः।
सकला भरणा भरणां रमणीं प्रकृतिं विकृतिं प्रणमा मिरमाम्॥ १४ ॥

दनुजै र्मनुजै स्तनुजै रदिते र्विनता तनयै र्विनुतां विनताम्।
नवनी रदनी लतनौ लसतीं हसतीं हि सतीं हरितो षकरीम्॥ १५ ॥

वरदा भयह स्तयुतां भजतां द्विरदा धिपसे वितपा दयुगाम्।
प्रमदा गणशे खरमो दवतीं प्रणमा मिसदा शरणा गतपाम्॥ १६ ॥

करवा लदलैः करवी र्ययुतैः रणभू मिगतै र्विहिता भ्युदयाम्।
अवधी रितनी चकुलां सततं अवधा रितस द्गुणके लिमतीम्॥ १७ ॥

धनधा न्यकरीं धनदा दिनुतां वनका न्तिकरीं मुनिमो दकरीम्।
अधुना मधुना विधिना नियतं भजनी यपदां ममता रहिताम्॥ १८ ॥

रतिको टिसमां विधिको टिनुतां बहुको टिविधै र्निधिभि स्सहितां।
यजनै र्भजनै र्यतिरा जवरै र्भुवने महितां परमां हिरमाम्॥ १९ ॥

॥ छत्रबन्धः ॥

मारजनी नीता पातु मान्या या भुवनेऽत्रतु।
वनीभुव मिह क्रान्ता वनीवलयगत्यन्ता॥ २० ॥




Figure 1: **छत्रबन्धः**

॥ कमलबन्धः ॥

याच गोकुलपेशाया या शापे शान्तिदा च या।
याचदा च सदामेया यामेदा श्रीशगोचया॥ २१ ॥




Figure 2: कमलबन्धः

इतिर ङ्गकृपा निवहा द्ग्रथितां मतिर ङ्गनटीं कमला कवितां।
सुखबो धकरीं सुकरां पठतात् सततं जनताऽ हितपा पहरीम्॥ २२ ॥

॥ इति श्रीकमलाधोदक स्तोत्रं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥